## बहुलं छन्दसि । (८/३६८७)

छन्दसि विषये बहुलं रुडागमो भवति । 'देवा अदुह्र' । गन्धर्वा [1]अप्सरसो अदुह्र । (मै. ४.२.१३) । दुहेर्लङि झकारस्य अदादेशे कृते रुट् । 'लोपस्त आत्मनेपदेषु' (७.१.४१/३५६३) इति [2]तकारलोपः । न च भवति, अदुहत । बहुलवचनादन्यत्रापि भवति । 'अदृश्रमस्य केतवः' (ऋ. १.५०.३) । 'ऋदृशोऽङि गुणः' (७.४.१६/२४०६) इत्येतदपि बहुलवचनादेवात्र न भवति ।।

## अतो भिस ऐस् । (९/२०३)

अकारान्तादङ्गादुत्तरस्य भिसः ऐस् [3]इत्ययमादेशो भवति । वृक्षैः । प्लक्षैः । अतिजरसैः । जरामतिक्रान्तैः इति [4]विगृह्य समासे कृते ह्रस्वत्वे च भिस ऐसादेशो भवति । 'एकदेशविकृतमनन्यवद् भवति' (व्या. प. १६) इति जरशब्दस्य जरसादेशः । 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' (व्या. प. १२) इति परिभाषा इयमनित्या, 'कष्टाय क्रमणे' (३.१.१४/२६७०) इति निर्देशात् । अतः इति किम् ? अग्निभिः । [5]वायुभिः । तपरकरणं किम् ? खट्वाभिः । मालाभिः ।

एत्वं भिसि परत्वाच्चेदत ऐस् क्व भविष्यति ।
कृतेऽप्येत्वे भौतपूर्व्यादैस्तु नित्यस्तथा सति (म. भा. ३.२४४) ।।

अतः इत्यधिकारो 'जसः शी' (७.१.१७/२१४) इति यावत् ।।

## बहुलं छन्दसि । (१०/३६८८)

छन्दसि विषये [6]बहुलमैसादेशो भवति । अतः इत्युक्तम्, अनतोऽपि भवति नद्यैः इति । अतो न भवति, देवेभिः सर्वेभिः प्रोक्तम् इति ।।

## नेदमदसोरकोः । (११/३४९)

इदम् अदस् इत्येतयोः अककारयोः [7]भिस ऐस् न भवति । एभिः । अमीभिः । अकोः इति किम् ? इमकैः । अमुकैः । अकोः इत्येतदेव प्रतिषेधवचनं ज्ञापकम् 'तन्मध्यपतितस्तद्ग्रहणेन गृह्यते' (व्या. प. २१) इति । [8]'इदमदसोः कात्' इति नोक्तम्, विपरीतोऽपि नियमः सम्भाव्येत 'इदमदसोरेव कात्' इति । ततश्चेह न स्यात्, सर्वकैः, विश्वकैः । इह च स्यादेव, एभिः, अमीभिः[9] । प्रतिषेधकरणं विपरीतनियमनिवृत्त्यर्थम् ।।

## टाङसिङसामिनात्स्याः । (१२/२०१)

अकारान्तादङ्गादुत्तरेषां [10]टाङसिङसाम् इन आत् स्य इत्येते आदेशाः भवन्ति यथासङ्ख्यम् । टा इत्येतस्य इनादेशो भवति । वृक्षेण । प्लक्षेण । ङसि इत्येतस्य आत् । वृक्षात् । प्लक्षात् । ङस् इत्येतस्य स्यादेशो भवति । वृक्षस्य । प्लक्षस्य । अतः इति किम् ? सख्या । पत्या । अतिजरसिन, अतिजरसात् इति केचिदिच्छन्ति । यथा तु भाष्ये तथा नैतदिष्यते इति लक्ष्यते ।।

---

1. अप्सरसः नास्ति ड. 2. तलोपः ब. क. ड. 3. इत्यादेशः ब. 4. विगृह्य नास्ति ड. इ. 5. वायुभिः नास्ति ब. 6. भिसः स्थाने इत्यधिकम् फ. 7. भिसः स्थाने क. 8. इदमदसोः – अमीभिः नास्ति क. 9. इति इत्यधिकम् ह. 10. टा ङसि ङस् इत्येतेषाम् ब. ह.